

तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये

*tasmai śrīgurumūrtaye nama idaṁ śrīdakṣiṇāmūrtaye*

Salutation to Śrī *Dakṣiṇāmūrt*i (Lord *Śiva* facing south) who is manifest in the form of my teacher.

# <u>गुरुवन्दनम्  (Guruvandanam)</u>

श्रुतिस्मृतिपुराणानाम् आलयं करुणालयम्। नमामि भगवत्पादं शङ्करं लोकशङ्करम् ॥ १॥

*śrutismṛtipurāṇānām ālayaṁ karuṇālayam*
*namāmi bhagavatpādaṁ śaṅkaraṁ lokaśaṅkaram*

I salute *Śaṅkarabhagavatpāda*, the abode of *śruti* (*Vedas*), *smṛti* (*Gītā*, etc.), and *purāṇas* (epics like *Rāmāyaṇa*, *Mahābhārata*, etc.), the repository of compassion, the one who bestows happiness on the world.

शङ्करं शङ्कराचार्यं केशवं बादरायणम् । सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥ २॥

*śaṅkaraṁ śaṅkarācāryaṁ keśavaṁ bādarāyaṇam*
*sūtrabhāṣyakṛtau vande bhagavantau punaḥ punaḥ*

I salute, again and again, *Śaṅkarācārya* who is Lord *Śiva*, and *Bādarāyaṇa* who is Lord *Viṣṇu*, the venerable ones who wrote the aphorisms (*Brahmasūtras*) and commentaries (*bhāṣyam* to B*rahmasūtras*).

ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने । व्योमवद्व्याप्तदेहाय दक्षिणामूर्तये नमः ॥ ३॥

*īśvaro gururātmeti mūrtibhedavibhāgine*
*vyomavadvyāptadehāya dakṣiṇāmūrtaye namaḥ*

Salutations to Lord *Dakṣiṇāmūrti*, who is all-pervasive like space, but who appears (as though) divided as Lord, Teacher, and Self.

गुकारस्त्वन्धकारो वै रुकारस्तन्निवर्तकः । अन्धकारनिरोधित्वाद् गुरुरित्यभिधीयते ॥ ४॥

*gukārastvandhakāro vai rukārastannivartakaḥ andhakāranirodhitvād gururityabhidīyate*

The letter “gu” stands for darkness (of ignorance), and “ru” represents its destruction. A *guru* is so called because he destroys the darkness (of ignorance).

सदाशिवसमारम्भां शङ्कराचार्यमध्यमाम् । अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥ ५॥

*sadāśivasamārambhām śaṅkarācāryamadhyamām*
*asmadācāryaparyantāṁ vande guruparamparām*

I salute the lineage of teachers, beginning with Śiva, the Lord, (linked by) *Śaṅkarācārya* in the middle, and extending to my own teacher.

## <u>दक्षिणामूर्ति ध्यानश्लोकाः (Dakṣiṇāmūrti Dhyānaślokāḥ)</u>

मौनव्याख्याप्रकटितपरब्रह्मतत्वं युवानं वर्षिष्ठान्तेवसदृषिगणैरावृतं ब्रह्मनिष्ठैः ।

आचार्येन्द्रं करकलितचिन्मुद्रमानन्दरूपं स्वात्मारामं मुदितवदनं दक्षिणामूर्तिमीडे ॥ १ ॥

*maunavyākhyāprakaṭitaparabrahmatatvaṁ yuvānaṁ varṣiṣṭhāntevasadṛṣigaṇairāvṛtaṁ brahmaniṣṭhaiḥ, ācāryendraṁ karakalitacinmudramānandarūpaṁ svātmārāmaṁ muditavadanaṁ dakṣiṇāmūrtimīḍe*

I salute *Śrī Dakṣiṇāmūrti*, the young *guru*, who teaches the knowledge of *Brahman* through silence, who is surrounded by disciples, who are themselves ṛṣis and scholars in the *Vedas*. (I worship *Śrī Dakṣiṇāmūrti*), who is the teacher of teachers, whose hand is held in the sign of knowledge of (*cin-mudrā)*, whose nature is fullness, who revels in himself, and who is ever silent.

चित्रं वटतरोर्मूले वृद्धाः शिष्या गुरुर्युवा । गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः ॥ २ ॥

*citraṁ vaṭatarormūle vṛddhāḥ śiṣyā gururyuvā*
*gurostu maunaṁ vyākhyānaṁ śiṣyāstu chinnasaṁśayāḥ*

Wonderous indeed! Under the tree were the aged disciples around the youthful *guru*! He taught them with silence, but the doubts of the disciples were dispelled.

निधये सर्वविद्यानां भिषजे भवरोगिणाम् । गुरवे सर्वलोकानां दक्षिणामूर्तये नमः ॥ ३ ॥

*nidhaye sarvavidyānaṁ bhiṣaje bhavaroginṇāṁ*
*gurave sarvalokānāṁ dakṣiṇāmūrtaye namaḥ*

Salutations to *Śrī Dakṣiṇāmūrti*, the storehouse of all learning, the healer of all those who suffer from the disease of saṁsāra and the teacher of the whole world.

ॐ नमः प्रणवार्थाय शुद्धज्ञानैकमूर्तये । निर्मलाय प्रशान्ताय दक्षिणामूर्तये नमः ॥ ४ ॥

*oṁ namaḥ praṇavārthāya śuddhajñānaikamūrtaye*
*nirmalāya praśāntāya dakṣiṇāmūrtaye namaḥ*

Salutations to *Śrī Dakṣiṇāmūrti*, who is the meaning of praṇva (*oṁ*), who is in the form of pure knowledge, who is taintless, who is silence, to that *Śrī Dakṣiṇāmūrti*, my salutations.

# दक्षिणामूर्ति स्तोत्रम् (Dakśiṇāmūrti Stotram)

विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं

पश्यन्नात्मनि मायया बहिरिवोद्भूतं यदा निद्रया ।

यः साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं

तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ १ ॥

*viśvaṁ darpaṇadṛśyamānanagarītulyaṁ nijāntargataṁ*
*paśyannātmani māyayā bahirivodbhūtaṁ yadā nidrayā* |
*yaḥ sākśātkurute prabodhasamaye svātmānamevādvayaṁ*
*tasmai śrīgurumūrtaye nama idaṁ śrīdakśiṇāmūrtaye* || 1||

बीजस्यान्तरिवाङ्कुरो जगदिदं प्राङ्निर्विकल्पं पुनः

मायाकल्पितदेशकालकलनावैचित्र्यचित्रीकृतम् ।

मायावीव विजृम्भयत्यपि महायोगीव यः स्वेच्छया

तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ २ ॥ ।

*bījasyāntarivāṅkuro jagadidaṁ prāṅnirvikalpaṁ punaḥ*
*māyākalpitadeśakālakalanāvaicitryacitrīkṛtam* |
*māyāvīva vijṛmbhayatyapi mahāyogīva yaḥ svecchayā*
*tasmai śrīgurumūrtaye nama idaṁ śrīdakśiṇāmūrtaye* || 2|||

यस्यैव स्फुरणं सदात्मकमसत्कल्पार्थगं भासते

साक्षात्तत्त्वमसीति वेदवचसा यो बोधयत्याश्रितान् ।

यत्साक्षात्करणाद्भवेन्न पुनरावृत्तिर्भवाम्भोनिधौ

तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ३ ॥

*yasyaiva sphuraṇaṁ sadātmakamasatkalpārthagaṁ bhāsate*
*sākśāttattvamasīti vedavacasā yo bodhayatyāśritān* |
*yatsākśātkaraṇādbhavenna punarāvṛttirbhavāmbhonidhau*
*tasmai śrīgurumūrtaye nama idaṁ śrīdakśiṇāmūrtaye* || 3||

नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वरं

ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिः स्पन्दते ।

जानामीति तमेव भान्तमनुभात्येतत्समस्तं जगत्

तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ४ ॥

*nānācchidraghaṭodarasthitamahādīpaprabhābhāsvaraṁ*
*jñānaṁ yasya tu cakśurādikaraṇadvārā bahiḥ spandate |*
*jānāmīti tameva bhāntamanubhātyetatsamastaṁ jagat*
*tasmai śrīgurumūrtaye nama idaṁ śrīdakśiṇāmūrtaye || 4||*

देहं प्राणमपीन्द्रियाण्यपि चलां बुद्धिं च शून्यं विदुः

स्त्रीबालान्धजडोपमास्त्वहमिति भ्रान्ता भृशं वादिनः ।

मायाशक्तिविलासकल्पितमहाव्यामोहसंहारिणे

तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ५ ॥

*dehaṁ prāṇamapīndriyāṇyapi calāṁ buddhiṁ ca śūnyaṁ viduḥ*
*strībālāndhajaḍopamāstvahamiti bhrāntā bhṛśaṁ vādinaḥ |*
*māyāśaktivilāsakalpitamahāvyāmohasaṁhāriṇe*
*tasmai śrīgurumūrtaye nama idaṁ śrīdakśiṇāmūrtaye || 5||*

राहुग्रस्तदिवाकरेन्दुसदृशो मायासमाच्छादनात्

सन्मात्रः करणोपसंहरणतो योऽभूत्सुषुप्तः पुमान् ।

प्रागस्वाप्समिति प्रबोधसमये यः प्रत्यभिज्ञायते

तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ६ ॥

*rāhugrastadivākarendusadṛśo māyāsamācchādanāt*
*sanmātraḥ karaṇopasaṁharaṇato yo'bhūtsuṣuptaḥ pumān |*
*prāgasvāpsamiti prabodhasamaye yaḥ pratyabhijñāyate*
*tasmai śrīgurumūrtaye nama idaṁ śrīdakśiṇāmūrtaye || 6||*

बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि

व्यावृत्तास्वनुवर्तमानमहमित्यन्तः स्फुरन्तं सदा ।

स्वात्मानं प्रकटीकरोति भजतां यो मुद्रया भद्रया

तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ७ ॥

*bālyādiṣvapi jāgradādiṣu tathā sarvāsvavasthāsvapi*
*vyāvṛttāsvanuvartamānamahamityantaḥ sphurantaṁ sadā |*
*svātmānaṁ prakaṭīkaroti bhajatāṁ yo mudrayā bhadrayā*
*tasmai śrīgurumūrtaye nama idaṁ śrīdakśiṇāmūrtaye || 7||*

विश्वं पश्यति कार्यकारणतया स्वस्वामिसंबन्धतः

शिष्याचार्यतया तथैव पितृपुत्राद्यात्मना भेदतः ।

स्वप्ने जाग्रति वा य एष पुरुषो मायापरिभ्रामितः

तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ८ ॥

*viśvaṁ paśyati kāryakāraṇatayā svasvāmisambandhataḥ*
*śiṣyācāryatayā tathaiva pitṛputrādyātmanā bhedataḥ |*
*svapne jāgrati vā ya eṣa puruṣo māyāparibhrāmitaḥ*
*tasmai śrīgurumūrtaye nama idaṁ śrīdakśiṇāmūrtaye || 8||*

भूरम्भांस्यनलोऽनिलोऽम्बरमहर्नाथो हिमांशुः पुमान्

इत्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम् ।

नान्यत्किञ्चन विद्यते विमृशतां यस्मात्परस्माद्विभोः

तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ९ ॥

*bhūrambhāṁsyanalo'nilo'mbaramaharnātho himāṁśuḥ pumān*
*ityābhāti carācarātmakamidaṁ yasyaiva mūrtyaṣṭakam |*
*nānyatkiñcana vidyate vimṛśatāṁ yasmātparasmādvibhoḥ*
*tasmai śrīgurumūrtaye nama idaṁ śrīdakśiṇāmūrtaye || 9||*

सर्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिन् स्तवे

तेनास्य श्रवणात्तदर्थमननाद्ध्यानाच्च सङ्कीर्तनात् ।

सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं स्वतः

सिद्ध्येत्तत्पुनरष्टधा परिणतं चैश्वर्यमव्याहतम् ॥ १० ॥

*sarvātmatvamiti sphuṭīkṛtamidaṁ yasmādamuṣmin stave*
*tenāsya śravaṇāttadarthamananāddhyānācca saṅkīrtanāt |*
*sarvātmatvamahāvibhūtisahitaṁ syādīśvaratvaṁ svataḥ*
*siddhyettatpunaraṣṭadhā pariṇataṁ caiśvaryamavyāhatam || 10||*